# .. shrIharinAmamAlA stotram ..

# ॥ શ્રીહરિનામમાલાસ્તોત્રમ્ ॥

## Document Information

Text title : harinAmamAlA

File name : harinAmamAlA.itx

Category : mAlAmantra

Location : doc_vishhnu

Language : Sanskrit

Subject : philosophy/hinduism/religion/vedanta

Transliterated by : DPD

Proofread by : DPD

Latest update : November 19, 2011

Send corrections to : Sanskrit@cheerful.com

Site access : http://sanskritdocuments.org

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted for promotion of any website or individuals or for commercial purpose without permission.

Please help to maintain respect for volunteer spirit.

August 2, 2016

*sanskritdocuments.org*

# ॥ શ્રીહરિનામમાલાસ્તોત્રમ્ ॥

ગોવિન્દં ગોકુલાનન્દં ગોપાલં ગોપિવલ્લભમ્ ।
ગોવર્ધનોદ્ધરં ધીરં તં વન્દે ગોમતીપ્રિયમ્ ॥ ૧॥

નારાયણં નિરાકારં નરવીરં નરોત્તમમ્ ।
નૃસિંહં નાગનાથં ચ તં વન્દે નરકાન્તકમ્ ॥ ૨॥

પીતામ્બરં પદ્મનાભં પદ્માક્ષં પુરુષોત્તમમ્
પવિત્રં પરમાનન્દં તં વન્દે પરમેશ્વરમ્ ॥ ૩ ॥

રાઘવં રામચન્દ્રં ચ રાવણારિં રમાપતિમ્
રાજીવલોચનં રામં તં વન્દે રઘુનન્દનમ્ ॥ ૪॥

વામનં વિશ્વરૂપં ચ વાસુદેવં ચ વિઠ્ઠલમ્ ।
વિશ્વેશ્વરં વિભું વ્યાસં તં વન્દે વેદવલ્લભમ્ ॥ ૫॥

દામોદરં દિવ્યસિંહં દયાળું દીનનાયકમ્ ।
દૈત્યારિં દેવદેવેશં તં વન્દે દેવકીસુતમ્ ॥ ૬॥

મુરારિં માધવં મત્સ્યં મુકુન્દં મુષ્ટિમર્દનમ્ ।
મુઞ્જકેશં મહાબાહું તં વન્દે મધુસૂદનમ્ ॥ ૭॥

કેશવં કમલાકાન્તં કામેશં કૌસ્તુભપ્રિયમ્ ।
કૌમોદકીધરં કૃષ્ણં તં વન્દે કૌરવાન્તકમ્ ॥ ૮॥

ભૂધરં ભુવનાનન્દં ભૂતેશં ભૂતનાયકમ્ ।
ભાવનૈકં ભુજઙ્ગેશં તં વન્દે ભવનાશનમ્ ॥ ૯॥

જનાર્દનં જગન્નાથં જગજ્જાડ્યવિનાશકમ્ ।
જમદગ્નિં પરં જ્યોતિસ્તં વન્દે જલશાયિનમ્ ॥ ૧૦॥

ચતુર્ભુજં ચિદાનન્દં મલ્લચાણૂરમર્દનમ્ ।
ચરાચરગુરું દેવં તં વન્દે ચક્રપાણિનમ્ ॥ ૧૧॥

શ્રિયઃકરં શ્રિયોનાથં શ્રીધરં શ્રીવરપ્રદમ્
શ્રીવત્સલધરં સૌમ્યં તં વન્દે શ્રીસુરેશ્વરમ્ ॥ ૧૨॥

યોગીશ્વરં યજ્ઞપતિં યશોદાનન્દદાયકમ્
યમુનાજલકલ્લોલં તં વન્દે યદુનાયકમ્ ॥ ૧૩ ॥

સાલિગ્રામશિલશુદ્ધં શંખચક્રોપશોભિતમ્ ।
સુરાસુરૈઃ સદા સેવ્યં તં વન્દે સાધુવલ્લભમ્ ॥ ૧૪॥

ત્રિવિક્રમં તપોમૂર્તિં ત્રિવિધઘૌઘનાશનમ્ ।
ત્રિસ્થલં તીર્થરાજેન્દ્રં તં વન્દે તુલસીપ્રિયમ્ ॥ ૧૫॥

અનન્તમાદિપુરુષં અચ્યુતં ચ વરપ્રદમ્ ।
આનન્દં ચ સદાનન્દં તં વન્દે ચાઘનાશનમ્ ॥ ૧૬॥

લીલયા ધૃતભૂભારં લોકસત્ત્વૈકવન્દિતમ્ ।
લોકેશ્વરં ચ શ્રીકાન્તં તં વન્દે લક્ષમણપ્રિયમ્ ॥ ૧૭॥

હરિં ચ હરિણાક્ષં ચ હરિનાથં હરપ્રિયમ્ ।
હલાયુધસહાયં ચ તં વન્દે હનુમત્પતિમ્ ॥ ૧૮॥

હરિનામકૃતામાલા પવિત્રા પાપનાશિની ।
બલિરાજેન્દ્રેણ ચોક્તા કણ્ઠે ધાર્યા પ્રયત્નતઃ ॥

॥ ઇતિ મહાબલિપ્રોક્તં હરિનામમાલાસ્તોત્રમ્ ॥

Encoded and proofread by DPD

.. shrIharinAmamAlA stotram ..
was typeset on August 2, 2016

Please send corrections to *sanskrit@cheerful.com*